# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 | प्रश्नपत्रम् – 5 | गुणाः – ५० |
| विषयः – रामानुजवेदान्तः | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – १७/०७/२०२१ | सन्दर्भग्रन्थः – श्रीमद्भगवद्गीता १०-१२ अध्यायाः | |

**सूचना - निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या।**

१ यो मामजमनादिं च वेत्ति लोकमहेश्वरम्।
असम्मूढः स मर्त्येषु सर्वपापैः प्रमुच्यते॥

२ अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः॥

३ अहमात्मा गुडाकेश सर्वभूताशयस्थितः।
अहमादिश्च मध्यं च भूतानामन्त एव च॥

**प्रश्नः २ भगवतः विभूतेः स्वरूपं सविस्तरं यथाग्रन्थं प्रतिपादयत।**

**प्रश्नः ३ भगवतः असाधारणान् कल्याणगुणगुणान् प्रतिपाद्य तस्य सर्वात्मत्त्वं संसाधयत।**

**प्रश्नः ४ कयोरपि द्वयोः पद्ययोः व्याख्या कार्या।**

१ मदनुग्रहाय परमं गुह्यमध्यात्मसञ्ज्ञितम्।
यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम॥

२ पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान्।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभावः॥

३ नाहं वेदैर्न तपसा न दानेन न चेज्यया।
शक्यं एवंविधो द्रष्टुं दृष्टवानसि मां यथा॥

**प्रश्नः ५ भगवतः स्वरूपम् एकादशाध्यायानुगुणं प्रतिपादयत।**

**प्रश्नः ६ एकादशाध्यायस्य सारांशं लिखत।**

**प्रश्नः ७ कयोरपि द्वयोरुपरि टिप्पणी लेख्या ।**

१ भगवतः भक्तिरूपोपासनायाः श्रेष्ठत्वम् ।

२ अनभिसंहितफलकर्मनिष्ठस्य उपादेयाः गुणाः ।

३ समबुद्धयः के ? स्पष्टयत ।

**प्रश्नः ८ यथाग्रन्थं भक्तियोगं प्रतिपादयत ।**

**प्रश्नः ९ भगवन्तमुपासीनानां भक्तानां युक्ततमत्त्वं सविशदं सविस्तरञ्च प्रतिपादयत ।**

**प्रश्नः १० अधोलिखितेषु दशानां लघूत्तराणि लिखत ।**

१ अजः कः ?

२ नित्यसृष्टिप्रवर्तनाय ब्रह्मणः मनसः के सम्भवाः ?

३ परमात्मा तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं किं ददाति ?

४ सर्वभूतानाम् उत्पत्तिस्थितिप्रलयहेतुः कः ?

५ दशमेऽध्याये कति श्लोकास्सन्ति ?

६ विभूतियोगः कस्मिन्नध्याये वर्णितः ?

७ परमात्मा साकारोऽस्ति वा निराकारः ?

८ गुडाकेशः कः ?

९ जगति सर्वो वेदिता वेद्यं च कः ?

१० एकादशाध्यायस्य नाम किम् ?

११ प्रत्यगात्मा कः ?

१२ अभ्यासात् किं श्रेयः ?

१३ द्वादशेऽध्याये कति श्लोकाः सन्ति ?

१४ भक्तियोगः कस्मिन्नध्याये प्रतिपादितः ?

१५ स्थिरमतिः भक्तिमान् नरः कस्य प्रियः ?

****